श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ अष्टमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ अष्टमः सर्गः ॥

## माल्यवतो युद्धं पराजयश्च सुमालिप्रभृतीनां रक्षसां रसातले प्रवेशः

हन्यमाने बले तस्मिन् पद्मनाभेन पृष्ठतः।
माल्यवान् सन्निवृत्तोऽथ वेलामेत्य इवार्णवः॥ **7.8.1** ॥

संरक्तनयनः क्रोधाच्चलन्मौलिर्निशाचरः।
पद्मनाभमिदं प्राह वचनं पुरुषोत्तमम्॥ **7.8.2** ॥

नारायण न जानीषे क्षात्रधर्मं पुरातनम्।
अयुद्धमनसो भीतानस्मान् हंसि यथेतरः॥ **7.8.3** ॥

पराङ्मुखवधं पापं यः करोति सुरेश्वर।
स हन्ता न गतः स्वर्गं लभते पुण्यकर्मणाम्॥ **7.8.4** ॥

युद्धश्रद्धाथवा तेऽस्ति शङ्खचक्रगदाधर।
अहं स्थितोऽस्मि पश्यामि बलं दर्शय यत् तव॥ **7.8.5** ॥

माल्यवन्तं स्थितं दृष्ट्वा माल्यवन्तमिवाचलम्।
उवाच राक्षसेन्द्रं तं देवराजानुजो बली॥ **7.8.6** ॥

युष्मत्तो भयभीतानां देवानां वै मयाभयम्।
राक्षसोत्सादनं दत्तं तदेतदनुपाल्यते॥ **7.8.7** ॥

प्राणैरपि प्रियं कार्यं देवानां हि सदा मया।
सोऽहं वो निहनिष्यामि रसातलगतानपि॥ **7.8.8**॥

देवदेवं ब्रुवाणं तं रक्ताम्बुरुहलोचनम्।
शक्त्या बिभेद सङ्क्रुद्धो राक्षसेन्द्रो भुजान्तरे॥ **7.8.9**॥

माल्यवद्भुजनिर्मुक्ता शक्तिर्घण्टाकृतस्वना।
हरेरुरसि बभ्राज मेघस्थेव शतह्रदा॥ **7.8.10**॥

ततस्तामेव चोत्कृष्य शक्तिं शक्तिधरप्रियः।
माल्यवन्तं समुद्दिश्य चिक्षेपाम्बुरुहेक्षणः॥ **7.8.11**॥

स्कन्दोत्सृष्टेव सा शक्तिर्गोविन्दकरनिःसृता।
काङ्क्षन्ती राक्षसं प्रायान्महोल्केवाञ्जनाचलम्॥ **7.8.12**॥

सा तस्योरसि विस्तीर्णे हारभारावभासिते।
आपतद् राक्षसेन्द्रस्य गिरिकूट इवाशनिः॥ **7.8.13**॥

तया भिन्नतनुत्राणः प्राविशद् विपुलं तमः।
माल्यवान् पुनराश्वस्तस्तस्थौ गिरिरिवाचलः॥ **7.8.14**॥

ततः कालायसं शूलं कण्टकैर्बहुभिश्चितम्।
प्रगृह्याभ्यहनद् देवं स्तनयोरन्तरे दृढम्॥ **7.8.15**॥

तथैव रणरक्तस्तु मुष्टिना वासवानुजम्।
ताडयित्वा धनुर्मात्रमपक्रान्तो निशाचरः॥ **7.8.16**॥

ततोऽम्बरे महाञ्छब्दः साधुसाध्विति चोत्थितः।
आहत्य राक्षसो विष्णुं गरुडं चाप्यताडयत्॥ **7.8.17**॥

वैनतेयस्ततः क्रुद्धः पक्षवातेन राक्षसम्।
व्यपोहद् बलवान् वायुः शुष्कपर्णचयं यथा॥ **7.8.18**॥

द्विजेन्द्रपक्षवातेन द्रावितं दृश्य पूर्वजम्।
सुमाली स्वबलैः सार्धं लङ्कामभिमुखो ययौ॥ **7.8.19**॥

पक्षवातबलोद्धूतो माल्यवानपि राक्षसः।
स्वबलेन समागम्य ययौ लङ्कां ह्रिया वृतः॥ **7.8.20**॥

एवं ते राक्षसा राम हरिणा कमलेक्षण।
बहुशः संयुगे भग्ना हतप्रवरनायकाः॥ **7.8.21**॥

अशक्नुवन्तस्ते विष्णुं प्रतियोद्धुं बलार्दिताः।
त्यक्त्वा लङ्कां गता वस्तुं पातालं सहपत्नयः॥ **7.8.22**॥

सुमालिनं समासाद्य राक्षसं रघुसत्तम।
स्थिताः प्रख्यातवीर्यास्ते वंशे सालकटङ्कटे॥ **7.8.23**॥

ये त्वया निहतास्ते तु पौलस्त्या नाम राक्षसाः।
सुमाली माल्यवान् माली ये च तेषां पुरःसराः।
सर्व एते महाभागा रावणाद् बलवत्तराः॥ **7.8.24**॥

न चान्यो राक्षसान् हन्ता सुरारीन् देवकण्टकान्।
ऋते नारायणं देवं शङ्खचक्रगदाधरम्॥ **7.8.25**॥

भवान् नारायणो देवश्चतुर्बाहुः सनातनः।
राक्षसान् हन्तुमुत्पन्नो ह्यजय्यः प्रभुरव्ययः॥ **7.8.26**॥

नष्टधर्मव्यवस्थानां काले काले प्रजाकरः।
उत्पद्यते दस्युवधे शरणागतवत्सलः॥ **7.8.27**॥

एषा मया तव नराधिप राक्षसाना -
    मुत्पत्तिरद्य कथिता सकला यथावत्।

भूयो निबोध रघुसत्तम रावणस्य
    जन्मप्रभावमतुलं ससुतस्य सर्वम् ॥ **7.8.28** ॥

चिरात् सुमाली व्यचरद् रसातलं
    स राक्षसो विष्णुभयार्दितस्तदा।
पुत्रैश्च पौत्रैश्च समन्वितो बली
    ततस्तु लङ्कामवसद् धनेश्वरः ॥ **7.8.29** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे अष्टमः सर्गः ॥